माधुरी
१

केवले

श्रीगणेशायनमः॥ न्यायांबुधिंकृतसेतुंहेतुंश्रीरामंमखिलसंपन्नेः।तांतंत्रिभुवनगीतंतर्कालंकारमादरंनत्वा॥श्रीमतामधुरानाथ
तर्कवागीशधीमता।विशदीकृत्यदृश्यंतेद्वितीयमणिफक्किका॥ आन्वीक्षिकीपंडितमंडलेषुसन्तोंडवैरध्ययनेविनापि॥मदुक्तमेतत्परि
चित्यधीराःनिःशंकमध्यापनमाततुध्वं॥३॥यद्यपीदंबहुषुबहुभिर्बहुधाचर्चितंज्ञायतेचकेश्चित्सामान्यतोहेत्वाभासान्तं तथापितत्
स्यानवितमशेषाप्रकाशकंबहुतरकुतर्कसंवलितंमत्साध्यकमतोव्यामोहायैवंसर्वेषांभवतीतिशिष्यबुद्धिवैशद्यायतन्नर्कभा
मूलव्याख्यानायस्वीनूजिघृक्षयाममात्रपरंनिबंधः॥प्रत्यक्षंनिरूपितमिदानीमनुमानंनिरूपणीयमतःशिष्यावधानायप्रतिजा
नीतेप्रत्यक्षानंतरमित्यादिना॥अन्यथारंभरूढितस्यादितिभावः॥प्रत्यक्षानंतरं॥प्रत्यक्षनिरूपणानंतरं॥उपमानात्प्राक्॥उपमान
निरूपणात्प्राक्॥अनुमानंनिरूप्यतइत्यन्वयः॥निरूप्यते॥लक्षणास्वरूपयोरामारायादिभिर्ज्ञेयते॥लक्षणास्वरूपप्रामाण्यादि
प्रकारकज्ञानानुकूलव्यापारविषयोनुमानमित्यर्थः॥व्यापारःशब्दप्रयोगरूपः॥तद्विषयताचव्याप्यारानुबंधिनी॥प्रत्यक्ष
योर्धानुमानयोर्धयोरेकवाक्यतापतियत्तयेप्रत्यक्षानुमानयोःसंगतिंलक्षणेनसंगतिमपिदर्शयतिप्रत्यक्षोयंजीवकत्वादिति॥
अनुमानस्यप्रत्यक्षकार्यत्वादित्यर्थः॥भवतिहिव्याप्तिज्ञानात्मकमनुमानंव्याप्तिग्रहात्मकप्रत्यक्षफलमितिभावः॥अत्रज्ञानजन्य
जिज्ञासायोज्यत्वंपंचम्यर्थः॥अन्वयश्चास्यप्रत्यक्षानंतरंनिरूपणं॥तथाचप्रत्यक्षोपजीवकत्वज्ञानजन्यजिज्ञासाप्रयोज्यप्र

क्षज्ञानानंतरनिरूपणविषयोनुमानमित्यर्थः॥ एतेनसंगतित्वेनसंगतिर्दर्शिता॥ अनंतराभिधानप्रयोजकजिज्ञासाजनकज्ञान
विषयत्वंहिसंगतित्वं॥ तत्रानंतराभिधानेप्रत्यक्षकार्यत्वज्ञानजन्यजिज्ञासाप्रयोज्यत्वग्रहेप्रत्यक्षकार्यत्वेपिअनंतराभि धानप्र
का२ योजकजिज्ञासाजनज्ञानंविषयत्वस्यग्रहात्तुल्यवित्तिवेद्यत्वेनोत्तरकालंमानसबोधसंभवात्॥ एकवाक्यत्वमेकप्रयोजनप्रयो
जनकप्रतियत्तिविषयार्थकत्वं॥ पूर्वग्रंथप्रतियत्तिप्रयोजनप्रयोजनकप्रतियत्तिविषयार्थकत्वमितियावत्॥ प्रयोजनंतुपरंपर
यामुक्तिरेव॥ एकवाक्यताप्रतियत्नोचसंगतिर्यद्दृष्टलिंगज्ञानविधयाहेतुः॥ यद्यत्संगतिमत्यतियादृक्वाक्यंभवतितत्तत्यति
पादकग्रंथैनैकवाक्यंभवति॥ यथासंनिकर्षग्रंथएव॥ प्रत्यक्षकार्यत्वएककार्यकारित्वादिरूपसंगतिमत्यतियादृक्वाक्यंभवति
प्रत्यक्षप्रतिपादकग्रंथैनैकवाक्यमपिभवतीतिव्याप्तेः॥ नचेतादृशैकवाक्यताप्रतियत्तिर्नप्रकृतोपयोगिनीतिवाच्यं॥ प्रतियत्नः
प्रयोज्य प्रत्यक्षग्रंथफलेछावतोनुमानग्रंथप्रवृत्युपयोगित्वात्॥ नन्वनुमानेप्रत्यक्षोयजीवकत्वेवत्चक्षुराद्यात्मकप्रत्यक्षेपिअनुमा
नोपजीवकत्वाविशिष्टतयानुमाननिरूपणानंतरंप्रत्यक्षनिरूपणाप्रवृत्तिः॥ भवतिहिकार्यमात्रेअदृष्टस्यहेतुतयाचक्षु
रादावव्यदृष्टेहेतुःतत्रोदृष्टंदीपदानादौप्रवृत्यातत्प्रवृत्तिश्चादीपदानादौस्वेष्टसाधनत्वाद्यनुमानादित्यदृष्टद्वाराचक्षुरा
दिकमनुमानोपजीवकं॥ नचादृष्टद्वारकोपजीवकत्वमेवसंगतिरितिवाच्यं॥ स्वेष्टसाधनत्वानुमितिहेतुकप्रवृत्यादिक्रम

घर्षणादिनाजनितायोरवङ्चक्षुरादिव्यक्तौअदृष्टाभावेपिपरंपरयानुमानोपजीवकत्वसत्वात् ॥नचयत्प्रत्यक्षद्वारकंसाक्षात्तज्जन्यत्वरूपंवोपजीवकत्वमेवसंगतिरितिवाच्यं॥मनसोनुमानत्वनये आत्ममनःसंयोगस्यनिर्विकल्पकद्वाराप्रत्यक्षत्वमितिकरणत्वेनप्रत्यक्षप्रमाणरूपस्यमनःसंयोगस्य साक्षात्मनोरूपानुमानजन्यत्वेनतादृशानुमानोपजीवकत्वस्यापिप्रत्यक्षेसत्वात् ॥एतेनयत्किंचित्यमितिविभाजकोपाध्यवच्छिन्ननिरूपितकलोपधानासत्वकरणत्वावच्छेदेनोपजीवकत्वमेवसंगतिः॥तच्चानुमानएवास्तिनत्विंद्रियासत्वप्रत्यक्षप्रमाणे॥मनःश्रवणयोरजन्यत्वात् ॥कलोपधानासत्वंविवक्षणादीश्वरीयव्याप्तिज्ञानस्यास्मदीयानुमितिस्वरूपयोग्यकरणत्वेपिअनुमाननिरूप्यत्वोपजीवकत्वस्यनसंगतित्वहानिरित्यपिप्रत्युक्तं॥मनसोनुमितिकरणत्वनयेनुमितिकरणत्वावच्छेदेनापिप्रत्यक्षोपजीवकत्वाभावात् ॥तादृशोपजीवकत्वस्यैवसंगतिलेशब्देनुयमानोपजीवकत्वस्यापिअसंगतत्वापातात्॥व्यवहारादितोपिशक्तिग्रहात् ॥शाब्दधीकरणत्वावच्छेदेनोयमानोपजीवकत्वाभावात्तद्वतिचेन्न॥प्रत्यक्षानुमानयोःपरस्परमुपजीवकत्वाविशेषेपियद्यदुपजीवकंतन्नतन्निरूपणानंतरंनिरूप्यमितिनियमाभावेनानुमाननिरूपणानंतरंप्रत्यक्षनिरूपणाप्रसंगविरहात्प्रत्यक्षनिरूपणानंतरमेवानुमाननिरूपितंनत्वनुमानानंतरंप्रत्यक्षमित्यत्रतुस्वतंत्रेच्छेत्यितिन्यायेनेक्षायएवनियामकत्वादितिदिक्॥अनुमानशब्दोपमानशब्दयोरेकवाक्यतापत्तयेअनुमानोपमानयोरपिसंगतिमत्त्वेव

निरूपणा

प्रदर्शयति बहुवादीति॥नचैतत्प्रदर्शनमुपमानेवसरएवोचितमितिवाच्यं॥स्वतंत्रेच्छस्यनियंतुमशक्यत्वात्॥नचतथाप्यनुमानस्यबहुवादिसंमतत्वोक्तीर्तनादिनाकथमुपमानेसंगतिलाभइतिवाच्यं॥बहुवादिसंमतत्वादियस्योपमानेबहुवादिसंमतानुमानोपजीवकत्वादित्यर्थः॥भवतिचगोसदृशोगवयपदवाच्यइत्याकारकातिदेशवाक्यार्थज्ञानासकोपमानंगवादिपदशक्तिग्राहकानुमानोपजीवकमितिभावः॥अत्रापिज्ञानजन्यजिज्ञासाप्रयोज्यत्वंचमयर्थः अन्वयस्तस्योपमानादित्यत्रोपमानपदार्थउपमाननिरूपणं॥दीधितिकृतस्तु बहुवादिसंमतत्वोक्तीर्तनेनावसरस्यसंगतिरुच्यते

स

तथाहि अनुमानस्यबहुवादिसंमतत्वेननिरसनीयत्वादिविप्रतिपत्तिकतयाबहुतरदुःखाजनकप्रतिपत्तिकत्वात् अत्रैवप्रथमंव्युत्पित्सोर्जिज्ञासानंतरमुपमाने तस्याल्पवादिसंमतत्वेननिरसनीयबहुवादिविप्रतिपत्तिकतयाबहुतरदुःखानुबंधिप्रतिपत्तिकत्वात् तथाचानुमानेप्रथमंप्रतिबंधकीभूतशिष्यजिज्ञासोत्पत्तौतन्निरूपणोचितत्वेनावसरसंगत्यानुपमाननिरूपणमितिभावइत्याहुः॥तन्नयेज्ञानप्रयोज्यप्राथमिकजिज्ञासाप्रयोज्योपमानप्राक्कनिरूपणं॥एवंचबहुवादिसंमतत्वज्ञानप्रयोज्यप्राथमिकजिज्ञासाप्रयोज्योपमानप्राक्कनिरूपणाविषयोनुमानमित्यन्वयइतिध्येयं॥मिश्रास्तुप्रत्यक्षोपजीवकत्वादित्याहुर्निरूप्यतइत्यंतग्रंथोऽकस्यचिल्लिखितः नतुवास्तविकः पाठः अथानु

मानंनिरूप्यतइत्येवपाठः वास्तविकः साधनेवसिद्धसाध्यसमभिव्याहारलभ्यस्यहेतुहेतुमद्भावस्यप्रतिबंधकीभूतशिष्यसि
ज्ञासानिवर्तकसिद्धत्वकथनेनावसरस्यवासंगतिलेलाभसंभवात् अन्यथाशब्दखंडेप्युपमानोपजीवकत्वादुपमाननि
रूपणानंतरंशब्दोनिरूप्यतइत्यस्यवक्ष्यमाणतादित्याहुः॥अनुमितेःप्रत्यक्षादिप्रमितिभिन्नत्वज्ञानंविनानुमितिकरण
त्वेनहेतुनानुमानस्येतरभेदज्ञानंनसंभवति अनुमितिप्रत्यक्षयोरभेदग्रहात् प्रत्यक्षादिप्रमितिकरणोव्याप्तिचारज्ञानायनेः
अतःप्रथमतः अनुमितेरितरभेदानुमापकमाहतत्रेति॥अतोनार्थांतरावकाशः॥केचित्तु अनुमितिकरणत्वमनुमानल
क्षणंकर्त्तव्यंतत्तुज्ञानंचनानुमितिज्ञानंविनासंभवतिस्यतत्घटकमूर्तिकत्वादतःप्रथमतःअनुमितिंज्ञापयतितत्रेति॥अतो
नार्थांतरावकाशइत्याहुः॥तत्र॥कर्त्तव्येलक्षणादिप्रकारकानुमाननिरूपणेविशेषणीभूतानुमितिःइदृशंज्ञानमित्यर्थः॥व्या
प्तिविशिष्टेति॥व्याप्तिविशिष्टंचतत्पक्षधर्मताज्ञानंचेतिकर्मधारयः।तथाचव्याप्तिविशिष्टंव्याप्तिप्रकारकंयत्पक्षधर्म
ताज्ञानंहेतोःपक्षसंबंधज्ञानंतज्जन्यज्ञानमनुमितिरित्यर्थः॥भवतिचपर्वतोवह्निमानित्याद्यनुमितिःवह्निव्याप्यधूमवा
न्पर्वतइत्यादिव्याप्तिप्रकारकपक्षहेतुसंबंधज्ञानजन्येतिलक्षणासमन्वयः॥अत्रकेवलधूमवान्पर्वतइत्यादिपक्ष

न्य धर्मताज्ञानजन्येतदनुव्यवसाये धूमव पर्वत वांद्देशइत्यादि विशिष्टवैशिष्ट्यबोधादौचातिव्याप्तिवारणाय व्याप्तिप्रकार केति॥नच
क्ष पं विशेष्यकहेतुसंबंधज्ञानत्वेनहेतुत्व विवक्षणेप्यतद्दोषस्यवारणासंभवतीतिवाच्यं॥असंभवापत्तेः॥अनुमितावपितेनरूपे
णाहेतुत्वात्॥वह्निव्याप्योधूमइत्यादिकेवलव्याप्तिप्रकारक ज्ञानजन्येवह्निव्याप्यधूमवान्पर्वतइत्यादिज्ञानेतिव्याप्तिवारणा
यपक्षधर्मतेति॥वह्निव्याप्यधूमवान्पर्वतइत्यादियरामर्शजन्यसंस्कारेतिव्याप्तिवारणायचरमज्ञानपदं॥अथतथापिवह्निव्या
प्यधूमवन्महानससदृशःपर्वतपदवाच्यइत्यतिदेशवाक्यार्थज्ञानजन्यायामयेयंपर्वतपदवाच्यइत्युपमितावतिव्याप्तिःतज्जन
कीभूतस्यातिदेशवाक्यार्थज्ञानस्यायंवह्निव्याप्यधूमवन्महानससदृशइतिसादृश्यप्रकारकपक्षधर्मता
ज्ञानत्वात्।इश्वरीयतादृशज्ञानमादायघटादिशब्दबोधादौचातिव्याप्तिः॥नचव्याप्तिप्रकारकपक्षधर्मताज्ञानजन्यत्वमत्र
तादृशनिश्चयत्वावच्छिन्नजनकतायतियोगिकजन्यत्वमितिनोयमितावतिव्याप्तिः तत्रतादृशनिश्चयत्वेनाहेतुत्वादितिवाच्यं
असंभवापत्तेः॥वह्निव्याप्योधूमः आलोकवान्पर्वतः वह्निव्याप्योधूमः धूमवान्पर्वतइतिज्ञानादप्यनुमितियसंगात्अ
नुमितावपितेनरूपेणाहेतुत्वात्॥नचव्याप्तिप्रकारकयपक्षधर्मताज्ञानजन्यत्वेपक्षविशेष्यकसंबंधावगाहित्वांशेव्याप्तिप्रकारक
निश्चयत्वावच्छिन्नजन्यत्वंपक्षविशेष्यकसंबंधावगाहित्वांशेव्याप्तिप्रकारकत्वंचव्याप्तिविशिष्टवैशिष्ट्यावगाहित्वपर्यवसन्नमि
तिनासंभवः वह्निव्याप्योधूमःधूमवान्पर्वतइतिज्ञानस्यव्याप्तिविशिष्टवैशिष्ट्यानवगाहितयाअनुमितौतेनरूपेणाहेतुत्व

वाधकाभावइतिवाच्यं॥वाधेःसोनाधिकरणानतिरिक्तयावह्निसमानाधिकरणधूमवान्पर्वतइतिज्ञानादप्यनुमि
तिप्रसंगात् अनुमितौतेनरूपेणाहेतुत्वादितिचेन्न हेतुरधिकरणप्रकारः अधिकरणंवृत्तित्वे वृत्तित्वमभावे अभावःप्र
तियोगिताप्रतियोगित्वमवच्छेदके अवच्छेदकंचान्योन्याभावे अन्योन्याभावःसाध्यतावच्छेदके तच्चसाध्येसाध्यमधि
करणं अधिकरणंवृत्तित्वे वृत्तित्वंहेतौ हेतुःपक्षइत्याकारकविलक्षणाविषयताकनिश्चयत्वावच्छिन्नजनकताप्रतियो
गिकजन्यतायाःविवक्षितत्वात्॥अतएवप्रथमज्ञानादप्यर्थसंशयान्यतादृशविलक्षणाविषयताकत्वेनहेतु
त्वेअसंभवापत्तेः इच्छादितोपिअनुमित्यनुपपादनुमितावपितेनरूपेणाहेतुत्वात् नचानुमितावगृहीतायामारोपक
तादृशनिश्चयत्वेनहेतुत्वादसंभवइतिवाच्यं विषयताविशेष्यभावेविनिगमनाविरहेणाद्यामारोपयहाभावस्यपृथगे
वहेतुतयाकारणतावच्छेदकेतस्याप्रवेशात् तस्यप्रवेशेपिअधिकंक्वितिन्यायेनतादृशनिश्चयत्वस्यकारणतावच्छेद
कत्वानपायाच्च॥अथतथापिवह्निव्याप्यधूमवत्पर्वतोदेशइत्यादिविशिष्टवैशिष्ट्यप्रत्यक्षेतादृशविशिष्टवैशिष्ट्या
वगाहिशाब्दबोधेचानित्याद्रिःरक्तोद्रव्यंनवेतिसंशयेरक्तद्रव्यवानितिज्ञानानुदयात्तत्तद्विशिष्टवैशिष्ट्यज्ञानेप
तितत्तद्विशेषणतावच्छेदकप्रकारकतत्तद्विशेषणनिश्चयत्वेनहेतुतयातत्रापियधोक्तनिश्चयत्वेनहेतुत्वादितिचेन्न

अभावविषयकत्वेनप्रतियोगित्वविषयकत्वेनवाचरमज्ञानविशेषणात्॥यथोक्तविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षा
देश्च व्याप्तिघटकतयाअभावादिविषयकत्वात्॥नचैवंपक्षधर्मतापदवैयर्थ्यं तादृशविलक्षणाव्याप्तिप्रकारकनि
श्चयत्वावच्छिन्नकारणतायाप्रतियोगिककार्यतायाश्चाल्पभावविषयकज्ञानत्वस्यैवसम्यक्त्वात्॥वह्व्याप्योधूमइत्यादि
केवलव्याप्तिप्रकारकज्ञानजन्यस्यवह्व्याप्यधूमवान्पर्वतइतिज्ञानस्यव्याप्तिघटकतयाअभावादिविषयकत्वेने
त्वकारणात्इतिवाच्यं असंभवापत्तेः अनुमितौव्याप्तेनरूपणाहेतुत्वात्॥तादृशव्याप्तिप्रकारकनिश्चयत्व
मयेष्यलाघवेनज्ञानत्वेनमनस्त्वेनवानुमितिंप्रतिकारणत्वात् परामर्शहेतुतयैवातिप्रसंगभंगात्॥अतएवस्थाणु
र्नवेतिसंशयोत्तरंजायमानेऽयंस्थाणुरितिप्रत्यक्षेइदंनरजतमितिभ्रमोत्तरंजायमानेइदंरजतमितिप्रत्यक्षेस्वातं
त्र्येणस्थाणुत्वव्याप्यवक्रकोटरादिमान् रजतत्वव्याप्यचाकचक्यविशेषवान्इत्यादिविशेषदर्शनस्यव्याप्तिप्रका
रकपक्षधर्मतानिश्चयासत्कस्यहेतुत्वेपिनातिव्याप्तिः विशेषदर्शनस्यविपरीतनिश्चयविरोधित्वेनविशेषणज्ञान
त्वेनवाहेतुतयातत्रतादृशनिश्चयत्वेनाकारणत्वात्॥तत्रव्याप्तेरयंनीतभानसामग्रीसत्वेनव्याप्तिघटकतयाअभा
वादिविषयकत्वाच्च॥नचातमानयेत्यादौतथात्वेनव्याप्तिविशिष्टोपस्थितिद्वाराजनितेवह्व्याप्यधूमवत्पर्वतमा

नयेतिशाब्दबोधेमहावाक्यार्थज्ञानस्यपदार्थोपस्थितिविधयाअवांतरवाक्यार्थज्ञानजन्यतयाऽपनयार्थज्ञानजन्यन्याया
र्थज्ञानेचातिव्याप्तिःपदार्थोपस्थितेःकारणतावच्छेदकेअतिरिक्तपदजन्यत्वस्यानुप्रविष्टतयानिश्चयत्वस्याप्रविष्टतया
चतत्रापितादृशनिश्चयत्वेनाकारणत्वात्॥व्याप्तिघटकतयाअभावादिविषयकत्वाच्च॥नापिपरामर्शानुव्यवसायेवह्निव्या
व्योधूमःआलोकवान्पर्वतइतिज्ञानानुव्यवसायेवाविषयविधयापरामर्शजन्येतादृशज्ञानस्यचहेतुत्वेऽतिव्याप्तिः॥
अनुव्यवसायादिकंप्रतिपरामर्शादेर्हेतुविषयत्वेनतत्तच्चक्लृप्तेनचहेतुतयातत्रापियथोक्तनिश्चयत्वेनाकारणत्वात्॥व्याप्तिघ
टकतयाअभावादिविषयकत्वाच्च॥एवमनुमितिपदजन्यतावच्छेदकेपरामर्शस्यहेतुत्वेऽपिनातिव्याप्तिःतत्राप्रामाण्यज्ञानास्कंदि
तयथोक्तनिश्चयत्वेनहेतुतयाकारणतावच्छेदकेअतिरिक्तस्याप्रामाण्यज्ञानस्कंदितत्वस्यप्रवेशात्॥व्याप्यरूपनीतभा
नस्यामर्शत्वेनव्याप्तिघटकतयातस्याभावादिविषयकत्वाच्च॥नचावह्व्याप्यधूमवान्पर्वतइत्यादिविशिष्टस्मरणो
तादृशविशिष्टानुभवस्यहेतुत्वेऽतिव्याप्तिः॥तस्यव्याप्तिघटकतयाअभावादिविषयकत्वात्तत्रतादृशविलक्षणाविषय
यताकज्ञानत्वेनतादृशविशिष्टानुभवस्यहेतुतयातादृशविलक्षणाविषयताक[redacted]
[redacted]निश्चयत्वेनाजनकत्वाच्च॥नचैवंतादृशसंशयात्स्मृत्यापत्तिः॥संस्कारभावाद्वृत्ततः

स्मरणानुत्पत्तेः॥संस्कारंप्रतितादृशनिश्चयत्वेनैवहेतुत्वात्॥नचविनिगमकाभावः॥संशयस्थलेसंस्कारा[illegible]कल्पनस्यै
वविनिगमकत्वात्स्थितिरहस्यं॥नचाभावाद्यविषयकत्वेनचरमज्ञानविशेषणेअभावादिविषयकानुमितावव्याप्तिःसाध्या
देरननुगमादेकोपादानेअन्यानुमितावव्याप्तिःव्यतिरेकानुमितौचाव्याप्तिःतत्रयोक्तविलक्षणाविषयताकनिश्चयत्वेना
हेतुत्वादितिवाच्यं तादृशकार्यतावच्छेदकाभावाद्यविषयकज्ञानवृत्तिप्रत्यक्षासमवेतधर्मसमवायित्वस्यविवक्षितत्वात्॥इत्थंच
पर्वतोवह्निमानित्याकारकान्वयव्याप्तिज्ञानजन्याभावाद्यविषयकानुमितिंप्रतिमादृशेवाभावादिविषयकानुमितावन्यथा
ध्यकानुमितौव्यतिरेकिसाध्यकानुमितौचलक्षणासमन्वयःतद्वृत्तितादृशधर्मस्यानुमितित्वस्यसर्वत्रसत्वात्॥अत्र
स्मृतागुणत्वज्ञानत्वानुभवत्वमादायातिव्याप्तिवारणायप्रत्यक्षासमवेतेति॥कालिकसंबंधेनानुमितित्वस्यापिप्रत्यक्षवृत्ति
त्वादतिव्याप्तिवारणायसमवायित्वमिति॥नचैवंचरमज्ञानपदंव्यर्थं[illegible]रामर्शजन्यसंस्कारस्यव्याप्तिघटकतयाअभावादि
विषयकत्वेनवारणात्स्थितिवाच्यं समवायेनतादृशकार्यतावच्छेदकाभावो[illegible]विषयकवृत्तितालाभायतंदुयाहानात्अन्यथा
जन्यमात्रस्यकालीयाधिनेयाकालिकसंबंधेनसंस्कारत्वघटत्वादेरपिअनुमितिवृत्तितयातिव्याप्त्यापत्तेः॥वस्तुतस्तु
तादृशकार्यतात्रयज्ञानसमवेतप्रत्यक्षासमवेतधर्मसमवायित्वमेववक्तव्यंनत्वभावाद्यविषयकत्वेनज्ञानेविशेषणीयं॥
दंडेरक्तोनवेत्याकारकसंशयोत्तरमपिरक्तत्वतद्भाववद्दंडवानितिरक्तत्वांशेसंशयाकारस्यरक्तत्वतद्भावविशिष्टवैशिष्ट्यविषय

ताकत्वमस्यानुभवसिद्धत्वात्तन्नहि शेषरूपतावच्छेदकप्रकारकतत्तद्विशेषणज्ञानत्वेनैवविशिष्टवैशिष्ट्यबोधंप्रति
हेतुतयावह्निव्याप्यधूमवत्पर्वतवादेशइत्यादिविशिष्टवैशिष्टबोधेअतिव्याप्तिविरहात् ॥तस्यकारणतावच्छेदकेनिश्चयत्वा
प्रवेशात् ॥हेतुतावच्छेदकादिरूपेणाहेत्वादिभिन्नविषयकभ्रमरूपपरामर्शादप्यनुमित्युत्पत्त्याअनुमितेःकारणतावच्छेदके
हेत्वादेस्तुनप्रवेशःशिष्टवैशिष्ट्यबोधकारणतावच्छेदकेचहेत्वादेरवश्यंप्रवेशःहेतुतावच्छेदकादिरूपेणाहेत्वादिभिन्नवि
षयकभ्रमरूपनिश्चयस्वेपिहेतुतावच्छेदकरूपेणाहेत्वादिविषयकविशिष्टवैशिष्ट्यबोधानुत्पत्तेःअतो निश्चयत्वस्य
तत्कारणतावच्छेदकेप्रवेशोव्यतिव्याप्तिविरहाच्च अनुमितिप्रतियपरामर्शस्ययेनरूपेणाहेतुतातदवच्छिन्नकारणतायारूप
लक्षणाघटकत्वात् ॥आयत्तेश्चकारणतावच्छेदकेअप्रामाण्यज्ञानस्यकदितत्वस्यअधिकस्यप्रवेशादेववारणात् ॥प्रत्यक्षास
प्रवेतेत्यनेनैववारणाच्च इत्थंचपरामर्शजन्यसंस्कारवारणायैवचरमज्ञानयदंनचाभावाद्य विषयकत्वविशेषणानुपादा
नंयच्चविषयविशेषेनियमतोवह्निव्याप्यधूमवत्पर्वतनिश्चयएवोद्बोधकविधयाहेतुःतादृशविषयविशेषस्मृतिमादाय
स्मृतिमात्रेअतिव्याप्तिःतत्त्वार्घवालाभान्यतोवह्निव्याप्यधूमवत्पर्वतनिश्चयत्वेनैवोद्बोधकविधयाहेतुत्वादितिवाच्यं ॥
चरमज्ञानपदस्यानुभवपरत्वात् तथाचतादृशविलक्षणाविषयताकनिश्चयत्वावच्छिन्नकारणताप्रतियोगिककार्य

रणमनुमानमित्यर्थः॥ननुतत्करणमित्यत्रतत्पदस्यानुमितिसामान्यजातिविशेषस्यप्रत्यायनात्करणाख्यटाचकरणात्वप्रत्यायनात् अनुमिति करणमनुमितिकरणमित्यनुमितिकरणत्वविशिष्टानुमितिकरणत्वविशिष्टस्याभेदसंसर्गेणान्वयोवाच्यः तथाचोद्देश्यतावच्छेदक विधेयतावच्छेदकयोरभेदान्वयात्घटोघटइतिवत्पुनरुक्तिः॥नचैवमाख्यातार्थयोर्भेदान्वयस्याव्युत्पन्नतयातत्करणमित्यस्यानुमितिसंबंधि भिन्नमनुमितिकरणमित्यर्थः॥तच्छब्दस्यानुमितिसामान्यजातिविशेषविशिष्टसंबंधिपरत्वात् करणतायाःकार्यघटितत्वेनकरणपदस्या नुमितिकरणपरत्वात्। अभिन्नत्वस्यचसंसर्गत्वात् अनुमानमित्यत्रतनुधात्वर्थस्यानुमितेःल्युट्प्रत्ययार्थेअनुमितिकरणेकरणता संबंधेनान्वयादनुमितिभेदनुमितिकरणमित्यर्थः करणतायाःकार्यघटितत्वेनानुमितिकरणस्यैवल्युडर्थत्वात् तथाचानुमिति संबंध्यभिन्नमनुमितिकरणमनुमितिभेदनुमितिकरणमित्यवशब्दबोधः विधेयतावच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वयो
वि द्देश्यतावच्छेदकपदादुल्लाभेनघटोनीलघटःनीलसधर्माघटोनीलघटइत्यादौवानपुनरुक्तिरितिवाच्यं तथापिकरणपदल्यु डादिपदयोःकरणतायाघटकपदार्थेषुअधिकरणतृतीत्वादिषुखंडशक्तिनयेपौनरुक्त्यस्यदुर्वारत्वात् खंडशक्तिनयेअनुमा नमित्यत्रधात्वर्थस्यानुमितेःकरणपदार्थेअधिकरणेआश्रयत्वेनान्वयादितिचेन्न तत्पदार्थ करणपदार्थयोर्नियताश्रयतिरे कनामार्थतयानामार्थयोर्भेदेनान्वयस्याव्युत्पन्नतयातत्पदार्थस्यानुमितेराश्रयतासंबंधेनकरणपदार्थेअधिकरणेन्वयासंभवात् अन्यथासकरणत्वंसकर्मत्वमित्याद्यापत्तेः नचैवंघटकरणंदंडइत्यादौखंडशक्तिनयेघटाधिकरणा

+ श्राश्रयतासंबंधेनाल्युडर्थेअधिकरणेऽन्वयवत्तत्करणमित्यत्रापितत्पदार्थस्यानुमितेः ३

ज वृत्त्यभावप्रतियोगितानवच्छेदकघटितस्यघटकरणत्वस्याप्रत्ययप्रसंगः करणपदादधिकरणात्तद्विलादेरप्यस्तित्वेपि घटस्य
ततोनुपस्थितेरितिवाच्ये करणादिपदस्यखंडशक्तिनयेपिकार्यवदंशेपिअवश्यंशक्तिरूपगमात् अन्यथाकेवल
करणादिपदात्तात्पर्यधीसत्वेपिविनाकार्यवाचकपदाध्याहारंघटाधिकरणप्रत्ययानापत्तेः कार्यवदृत्त्यभावप्रतियोगि
तानवच्छेदकधर्मवत्वघटितकरणत्वे गौरवादधिकरणत्वेनाधिकरणप्रवेशात् अधिकरणांशेकार्यातिरिक्तस्याप्रकारतया का
द र्यवत्वरूपेणोपकार्याधिकरणेकरणादिपदस्यशक्तेरावश्यकत्वाच्च अन्यथापदान्निर्वाक्यकोपस्थितेरनभ्युपगमेनअधिकरणा
द स्यततोनुपस्थितिप्रसंगात्।।नचकार्यवाचकघटादिपदस्यकार्यवतित्वस्यकरणात्करणादिपदस्यकेवलवृत्तिलादिष्टेवशक्तिः
कार्यवतोनिरूपकतासंबंधेनवृत्तित्वेअन्वयाच्चविशिष्टलाभइतिवाच्यं तर्हिलाघवात्करणादिपदस्यकेवलधर्मिणेवशक्त्यापत्तेः
इतरांशस्यकार्यवाचकघटादिपदेलक्षणायेवलाभसंभवात्।।एतेनखंडशक्तिनयेकरणादिपदस्यनामलेपिअव्ययनियातादिपदा
त्य २ र्थानांयथाभेदेनान्वयोव्युत्पत्तिर्वाच्यात् तथाकरणादिपदसमभिव्याहृतषष्ठ्यादीतरविभक्तिशून्यतादादिपदार्थस्याधिकरण
पदार्थभेदेनान्वयोव्युत्पत्तिर्वाच्यादितिकस्यचित्प्रलपितमयास्तं।।खंडशक्तिनयेपिकार्यवदंशेशक्तेरावश्यकत्वेव्युत्पत्तिसंकोच
प्रमाणाभावात् तदादियदस्यकार्यसंबंधियरतयातादात्म्येनबोधसंभवात् नचखंडशक्तिनयेपिकार्यवदंशेशक्तेराव

ताश्रयानुभवसमवेतप्रत्यक्षासमवेतधर्मसमवायित्वंलक्षणांकलितमितिनकोपिदोषइतिसंप्रदायः॥तदसत्॥अनुमिति
परामर्शयोःतत्तद्व्यक्तित्वेनैवहेतुहेतुमद्भावनयेअनुमितावयितादृशनिश्चयत्वेनाहेतुत्वादसंभवापत्तेः॥नव्यास्तु॥येनयराम
र्शेना व्यवहितोत्तरमनुमितिरेवजनितानतूपमित्यादितादृशपरामर्शविषयंव्याप्तिप्रकारकपक्षधर्मताज्ञानपदमितिनकार्य्यतिव्या
प्तिःजन्यत्वचैकाभावछेदेनाव्यवहितोत्तरक्षणावृत्तित्वं अन्यथातादृशनिश्चयत्वावच्छिन्नकारणानानिरूपितजन्यत्वस्यप्रवेशेदुक्तरी
त्याअसंभवापत्तेः।जन्यतासामान्यनिवेशोज्ञानत्वेनकार्यत्वेनविशेषणाज्ञानत्वेनविशिष्टबुद्धित्वेनेत्यादिरूपेणाकार्यकारणभावभंगा
दायशाब्दबोधादेरपितादृपरामर्शविशेषजन्यत्वेनातिव्याप्त्यापत्तेः नचैवंपरामर्शोत्तरजन्यानुमितावव्याप्तिरितिवाच्यं तादृशज्ञा
नवृत्तिप्रत्यक्षासमवेतधर्मसमवायित्वस्यविवक्षितत्वात्॥समवायेनतद्वृत्तितालाभायचरमज्ञानपदं॥नचैवंयोकोचिदनुमिति
व्यक्तिमादायतद्व्यक्तिसमवेतप्रत्यक्षासमवेतधर्मसमवायित्वमेववाच्यं तस्यापिलक्षणोत्तरत्वात्॥प्रकृतेचतस्याप्रवेशेनवै
यर्थ्यभावात् इत्थंचव्याप्तिविशिष्टस्यव्याप्तिविशिष्टपक्षधर्मतेतिषष्ठीसप्तमीतत्पुरुषाभ्यांव्याप्तिविशिष्टवृत्तियीपक्षधर्मता
तत्तज्ज्ञानजन्यज्ञानमनुमितिरित्यर्थोलभ्यते वह्व्याप्योधूमःधूमवान्पर्वतइतिज्ञानजन्यानुव्यवसायादेरतिव्याप्तिः
ज्ञानपदस्यज्ञानविशेषपरत्वेनैववारणात् हृदोवह्निमानित्यादिभ्रमानुमितेःवह्व्याप्यजलवानित्यादिभ्रमजन्यपर्वतीयवह्नि
मानित्यादिप्रमानुमितेश्चताद्दशधर्मघटनयैवसंग्रहात्॥एवंव्याप्तिविशिष्टश्चासौपक्षधर्मश्चेतिव्याप्तिविशिष्टपक्षधर्मःतस्यभा

वः व्याप्तिविशिष्टपक्षधर्मतेति कर्मधारयोत्तरभावप्रत्ययेन व्याप्तिविशिष्टसमानाधिकरणपक्षधर्मताज्ञानजन्यज्ञानम
नुमितिरित्यर्थोपिसंभवति भ्रमानुमित्यव्याप्त्यादेर्यथोक्तरूपेणोद्धारणात् एवं व्याप्तिविशिष्टश्चपक्षधर्मश्च व्याप्तिविशिष्ट
पक्षधर्मौ तयोर्भावः तथा। तज्ज्ञानजन्येज्ञानमनुमितिरिति हेतूत्तरतत्प्रत्ययेन व्याप्तिपक्षधर्मत्वोभयविषयकंज्ञानंमनु जन्यज्ञान
मितिरित्यर्थोपिसंभवति धूमोवह्निव्याप्यः आलोकवान्पर्वत इतिज्ञानजन्ये धूमोवह्निव्याप्योधूमवान्पर्वत इतिज्ञान
जन्येचाति व्याप्तेः ज्ञानपदस्यविशेषणत्वादेववारणादित्याहुः केचित्तु व्याप्तिप्रकारकपक्षधर्मताज्ञानजन्यत्वमेवलक्षणं
यास्यं जन्यत्वंचपरामर्शत्वावच्छिन्नकारणतानिरूपितजन्यतावच्छेदकतयास्वीकारात् परामर्शत्वंचानुमितित्वावच्छिन्नकार्यतानिरूपितकारणता
वच्छेदकतयास्वीकारात् द्वोमानसत्वव्याप्योजातिविशेषः सर्वत्रमानसपरामर्शादेवानुमितिरित्युपगमात् व्याप्तिविलंबस्यशपथ
निर्णीतत्वात् एवंचनक्वाप्यतिप्रसंगः अन्यत्रतादृशजातिविशेषेणाहेतुत्वात् इत्थंचतादृशधर्मघटनापिनकर्तव्या व
ह्निव्याप्यधूमवान्पर्वतइतिनिश्चयस्यपरामर्शत्वावच्छिन्नकारणतानिरूपितानुमितित्वावच्छिन्नजन्यतायाअनुमितिमात्र
एवसत्वात् आपत्तेश्चकारणतावच्छेदकेअप्रामाण्यज्ञानास्कंदितत्वस्याधिक्यप्रवेशादेववारणात् आपत्तीतरत्वेनवा
चरमज्ञानेविशेषणीयमित्याहुः॥ ॥तत्करणमिति॥ तत्पदंअनुमितित्वरूपजातिविशेषविशिष्टपरं तथाचानुमितेःक

एककेकार्यभेदेनशक्तिभेदस्यावश्यंविशिष्टतयाविशिष्टशक्तिपक्षएवखंडशक्तिपक्षेकिंलाघवमितिवाच्यं वैशिष्ट्यांश
शक्तेरकल्पनादेवलाघवसंभवात् एवंचखंडशक्तिपक्षेपिप्रकृतेअनुमितिसंबंधिमदनुमितिकरणमनुमितिमदनुमिति
करणमित्यन्वयबोधानुपपत्तिरनुसंधेया॥ केचित्तुतत्यदंशस्वरूपतोनानुमितित्वजातिविशिष्टपरं किंतुव्याप्तिविशि
ष्टपक्षधर्मताज्ञानजन्यज्ञानवृत्तिप्रत्यक्षासमवेतधर्मत्वरूपेणतादृशधर्मसमवायिपरं तथाचतादृशधर्मसमवायिकरण
मनुमानमित्यर्थः अतोनयुनरुक्तिशंकापि॥ नचैवंतादृशधर्मसमवायिकरणत्वेनेतरभेदसाधनवैयर्थ्यविशेषणत्वेतत्घटकस्यव्या
प्तिज्ञानस्यैवगमकत्वसंभवात् नचव्याप्तिज्ञानत्वेनव्याप्तिज्ञानत्वेनप्रविष्टमितिनवैयर्थ्यमितिवाच्यं तथाप्रवेशेनव्याप्तिज्ञानस्यैवगम
कत्वसंभवात् नचव्याहतमनुगमेनैकतरव्याप्तिज्ञानस्यहेतुत्वेअनुमितिकरणमात्रस्यपक्षत्वानुभागासिद्धिरवस्तादृशधर्मसमवा
यिकरणत्वेसर्वसाधारणहेतुरितिवाच्यं अधिकस्यभागासिद्धिवारकत्वेयिव्याप्यहानुपयुक्तनयावैयर्थ्यादितिचेन्न भिन्नधर्मिक
तयाधूमप्रागभावत्वद्वैयर्थ्यात् करणत्वनिरुक्त्याऽव्याप्तिज्ञानत्वाद्यनवच्छेदकत्वादित्याहुः॥ ॥लक्षणमुक्त्वास्वरूपमाह तच्चेति
अनुमानंचेत्यर्थः॥ लिंगपरामर्शोव्याप्तिज्ञाने परामर्शस्यव्यापाराभावेनाकरणत्वात् अन्येतुनचैतावताअनुमितिकरणत्वमनु
मानलक्षणमुक्तंतत्कथंस्यात् ज्ञायमानलिंगस्यानुमितिकरणत्वेनानुमानेतरप्रसिद्ध्याइतरभेदानुमापकत्वाभावात्इतर

क मेदानुमानस्येवलक्षणपदार्थत्वादतआह तच्चेतीत्याहुः॥ नन्वनइति॥परामृश्यमाणलिंगस्यानुमितिकरणत्वेअतीतानाग
तलिंगादनुमितिर्नस्यादितिभावः॥लक्षणंनिरूपितमिदानींप्रामाण्यंनिरूपयितुंप्रथमतःचार्वाकमतमाशंकतेअथेति नप्रमा
णं नप्रमितिकरणं ननुयदिचानुमानंप्रमाणमित्यर्थःतदाअप्रयासिद्धिः तन्मतेनुमितित्वस्याप्रसिद्धेः यद्यनुमानंधूमादि
नप्रमाणमित्यर्थः तदासिद्धुसाधनंव्याप्तिज्ञानस्यैवनेयायिकैःप्रमाणत्वोपगमादितिचेन्न अनुमानमित्यस्यव्याप्तिज्ञानमित्यर्थ
त्वं नचतथाप्यप्रयासिद्धिःतन्मतेसर्वत्रव्यभिचारसंशयेनव्याप्तिनिश्चयानुत्पादादितिवाच्यं तन्मतेसंशयात्मकस्यासिद्धेः नचो
शतर्कसिद्धुसाधनं पक्षतावच्छेदकावच्छेदेनसाध्यसिद्धेरदृश्यत्वात् नचनिर्विकल्पकस्यप्रत्यक्षात्मकप्रमितिंप्रतिकरणत्वाद्बाधइ
तिवाच्यं निर्विकल्पकस्यप्रमितिकरणत्वाभावात् विशिष्टज्ञानस्यतुतन्मतेअसद्विषयकत्वेनाप्रमितित्वात् अत्रचयमाजनक
तावच्छेदकरूपशून्यत्वादितिहेतुरूह्यः तच्चतन्मतेदृष्टित्वंअस्मन्मतेव्याप्तिनिश्चयत्वादिकमपि नचयंहेतुःस्वरूपासिद्धुः
तादृशव्याप्तिनिश्चयत्वस्यैवसर्वत्रसत्वादित्यतआह योग्योपाधीनामिति साध्यव्यापकतयागृहीतानामिंधनादिलक्षणायोग्यधर्मी
णामित्यर्थः योग्यानुपलब्ध्या योग्यतासहितानुपलब्ध्या अभावनिश्चयेतीति प्रत्यक्षतोव्यभिचारितंबंधेनेंधनत्वादिरूपेणाभावस्य
धूमादिहेतोर्निश्चयेतीत्यर्थः तेनोपाधित्वस्यातीन्द्रियत्वेनतदवच्छिन्नाभावस्यलौकिकप्रत्यक्षागम्यत्वेपिनक्षतिः नचव्यभिचारित्व
स्यातीन्द्रियघटितयातत्संबंधेनेंधनत्वावच्छिन्नाभावोयिकथंलौकिकप्रत्यक्षगम्यइतिवाच्यं साध्याभाववद्यत्किंचिद्योग्यव्यक्ति

वृत्तित्वरूपव्यभिचारितासंबंधेनतद्भावस्यप्रत्यक्षसंभवादितिभावः अयोग्योपाधिशंकयेति साध्यव्यापकतयागृहीतस्यमनोवासा
दिलक्षणायोग्यधर्मस्यव्यभिचारितासंबंधेनधूमादिहेतौशंकयेत्यर्थः यद्वासाध्यव्यापकत्वरूपयोग्यधर्मप्रकारेतासाध्यव्यापकी
भूतधर्मस्यव्यभिचारितासंबंधेनधूमादौशंकयेत्यर्थः व्यभिचारसंशयादिति सर्वत्रहेतौसाध्यव्यभिचारसंशयादित्यर्थः व्यभिचा
रसंशयेव्याप्तिनिश्चयस्यैवासंभवोलोकंतत्रव्याप्तिनिश्चयत्वमितिभावः ननुभूयःसाध्यसाधनसहचारज्ञानस्यव्यभिचारज्ञानप्र
तिबंधकतयातत्रास्तितत्रैवव्यभिचारसंशयासंभवेनव्याप्तिनिश्चयसंभवइत्यतआहज्ञातशइति ज्ञातशःसहचरितत्वेनज्ञात
योर्द्वयोरित्यर्थः तथाचभूयःसहचारज्ञानस्यव्यभिचारज्ञानप्रतिबंधकत्वमेवास्तिदुर्निमितिभावः नचैवंवह्निसंनिकर्षपर्वतवि
शेष्यकवह्निप्रकारकसंस्कारोद्बुद्धभावदशायामग्निधूमदर्शनानंतरंपर्वतोवह्निमानितिशब्दप्रयोगोनुभूयतेसकथंस्यात् नादृशशब्द
प्रयोगंप्रतिपर्वतविशेष्यकवह्निप्रकारकबुद्धेर्हेतुत्वादित्यतआह लोकइति लोकानामित्यर्थः धूमादीति वह्निसंनिकर्षप
र्वतविशेष्यकवह्निप्रकारकसंस्कारोद्बुद्धभावदशायांमित्यादिः॥ वह्न्यादिव्यवहारः॥ पर्वतोवह्निमानित्यादिशब्दप्रयोगः॥ केचित्तुवह्न्यादिव्यवहारः
पर्वतविशेष्यकवह्निप्रकारकप्रवृत्तिरित्याहुः तदसत् वह्निप्रकारिकापर्वतेप्रवृत्तिर्हिसाध्यतयोद्दिश्यतयोपादानतयावा नाद्यो वह्निमत्प
र्वतस्यसिद्धत्वात् नांत्यःउपादानगोचरलौकिकसाक्षात्कारस्यैवप्रवृत्तिहेतुतयान्यूनयेयनुमित्यात्मकज्ञानसंभवादितिबोध्यं संभा
वनेति संभावनापर्वतविशेष्यकवह्न्यसंसर्गीग्रहःवह्नेर्पर्वतस्यचज्ञानं नचलाघवात्व्यवहारंप्रतिविशिष्यैवहेतुत्वं नत्वसंसर्गी

ग्रहोगौरवादितिवाच्यं नहिवयमसंसर्गग्रहादेर्व्यवहारहेतुत्वंब्रूमः किंत्वतदुपलक्षितवृत्त्यादिज्ञानादीनामेवकुर्वद्दृपलक्षेन तद्धर्मविशेषणानंतानुमितिकल्पनायेक्षयाकुर्वद्दृपलक्षकल्पनायाश्चलघुत्वादितिभावः ननुधूमदर्शीनानंतरवृत्त्यादिव्यवहारजनिकानसंभावनातज्जनकीभूतज्ञानस्यवह्निमतिवह्निप्रकारकानुभवत्वेनानुभवादित्यतआहसंबंधेनेति संबंधेन संबंधिव्यवहारजनकत्वादिरूपसाधारणधर्मदर्शनेदोषेणा प्रामाण्यं वह्निमतिवह्निप्रकारकानुभवत्वं अभिमानः पुनरगृहीतासंसर्गकंज्ञानद्वयमेकंवेत्यन्यदेतत् उपसंहरतिइतीति इत्यतोहेतोःप्रत्यक्षातिरिक्तेनप्रमाणमित्यर्थः अनुमानाप्रामाण्येतेनघटपदंघटेशक्तेअस्तिवृत्त्यनरेवृद्धैस्तत्रप्रयुज्यमानत्वादित्यादिप्रकारेणशक्तिग्रहस्यशब्दःप्रमाणमस्यादितिशब्देनप्रमाणं शब्दस्याप्रामाण्येतेनातिदेशवाक्यार्थज्ञानस्योपमानेप्रमाणमस्यादितिउपमानमपिनप्रमाणमितिभावः नचैवंप्रत्यक्षातिरिक्तस्य अप्रामाण्यात्कथमतींद्रियपदार्थसिद्धिरितिवाच्यं तैरतींद्रियपदार्थानभ्युपगमादितिभावः ननूपक्रमोपसंहारयोर्विरोधः येनरूपेणाप्रतिज्ञाक्रियतेतेनैवरूपेणानिगमनमितिकथकसंपदायसिद्धत्वात् अत्रचानुमानेनप्रमाणमित्यस्यप्रक्रांतत्वात् नाप्रत्यक्षंप्रमाणमित्यस्योपसंहारादितिचेत् अत्रमिश्राःनाप्रत्यक्षंप्रमाणमित्युपक्रमः अनुमानेनप्रमाणमित्यादिकंतुहेतुरित्याहुः नव्यास्तुनाप्रत्यक्षंप्रमाणमित्यपिप्रतिज्ञानंतरं नत्वनुमानेनप्रमाणमित्यस्योपसंहारः तथाचयतोनुमानेनप्रमाणमतोप्रत्यक्षातिरिक्तेशब्दोपमानमपिनप्रमाणमित्यर्थइत्याहुः वेदांतास्तुनाप्रत्यक्षंप्रमाणमित्यपिनोपसंहारः अनुमानेनप्रमाणमित्यपिनोपक्रमः उपक्रमोपसंहारयोःप्रतिज्ञानिगमनयोःतैरनंगीकारात् किंत्वस्वरूपकीर्तनमात्रमि

त्येवतलं अथानुमानस्याप्रामाण्येकेनप्रमाणेन किंप्रमाप्रयोजकतावच्छेदकरूपशून्यत्वेनलिंगेनानुमानेन किंवानुमानेनप्रमा
णमितिशब्देनतत्राद्येआह अप्रमाणेति अप्रमाणसाधर्म्येण अप्रमाणत्वव्याप्येन प्रमाजनकतावच्छेदकशून्यत्वेन दृष्टस्य
धर्म्मस्य साधर्म्यदर्शनस्य अप्रमाणत्वव्याप्यदर्शनस्येतियावत् अत्रेआहस्तद्वाक्यस्येति अनुमानेनप्रमाणमितिवाक्य
स्येत्यर्थः अर्थवत्त्वात् प्रयोजनवत्त्वात् ननुत्वंप्रतीत्यर्थः तयोः संशयविपर्ययोः अयमर्थः अनुमानेप्रमाणंनवेतिसं
शयस्य अनुमानेप्रमाणमेवेतिविपर्ययस्यवानिरासस्साधनताज्ञानाहेतद्वाक्यप्रयोगेनवप्रवृत्तिः तच्चज्ञानंकथंस्यात् पर
कीयसंशयविपर्ययोरप्रत्यक्षत्वात् अतोनुमानप्रामाण्यमवश्यंत्वयाभ्युपेयमिति प्रामाण्याप्रामाण्योरिति प्रामाण्येअप्रा
माण्येचेत्यर्थः व्याघातः प्रत्यक्षातिरिक्तस्याप्रामाण्यव्याघातः प्रामाण्येआयातंप्रत्यक्षातिरिक्तस्यशब्दस्यसाक्षाद्वेप्रा
माण्येनप्रामाण्यंप्रमाजनकत्वमितिव्याघातइत्यर्थः अप्रामाण्येअप्रामाण्यमप्रमाजनकत्वमितितेनानुमानेअप्रामाण्यस्यभ्रम
एवजननियःभ्रमत्वंचज्ञानस्यविषयबाधाधीनमेवेतिअनुमानाप्रामाण्यबाधएवेतिभावः ननुभ्रमजनकत्वलक्षणमप्रामाण्यं
शब्देस्वीक्रियतेयेनभ्रमत्वस्यविषयबाधाधीनतयाप्रत्यक्षातिरिक्तस्यानुमानप्रामाण्यंस्वीकारायोपपत्तिपरंतुप्रमाकरणत्व
व्यतिरेकलक्षणमित्यस्वरसादाह अथचेति प्रत्यक्षस्याप्यप्रमात्वापत्तेरिति प्रमाणत्वाभावापत्तेरित्यर्थः प्रमात्वेप्रमाणाभा

य

वादितिभावः॥कथंप्रमाणंनास्तितदाहप्रामाण्यस्येति प्रमात्वस्येत्यर्थः ननुप्रत्यक्षेस्वयंप्रमात्वंस्वेनैवगृह्यतइतिस्वयमेवप्रमात्वप्र
माणंअनुमानतत्रानुमानापेक्षाइत्यतआहस्वतइति नसंशयइति प्रमात्वसंशयइत्यर्थः अयंघटइत्यादिज्ञानानंतरंतृती
यक्षणेइदंज्ञानंप्रमानवेतिसंशयोजायतेभवन्मतेतन्नस्यात् स्वेनैवस्वप्रामाण्यस्यनिश्चितत्वादितिभावः एतच्चायातनः
अयंघटइत्यादिसविकल्पकज्ञानमेवहितृतीयक्षणेप्रमात्वसंशयः तेनचतन्नयेस्वस्मिन्नप्रामाण्येगृह्यतेतस्यासन्मात्रवि
षयकत्वेनप्रमात्वस्यैवतत्राभावात् किंतुयारमार्थिक व्यक्तिमात्रविषयक निर्विकल्पकज्ञानमेवतन्मतेप्रमातेनैव
स्वस्मिन्प्रामाण्येस्वेनगृह्यतेतत्रचतृतीयक्षणेप्रामाण्यसंशयोऽसिद्धः किंचसंशयंप्रत्यपिकुर्वद्रूपत्वेनैवनिश्चयंप्रतिबं स
धकत्वात् निश्चयसत्वेपिसंशयोत्पत्तौ विरोधाभावःकुर्वद्रूपत्वस्यफलबलकल्पत्वेनयदुत्तरंसंशयोजायतेतत्रतद्भावात्
त वस्तुस्तु अनुमानस्याप्रामाण्येनिर्विकल्पकज्ञानस्यैवसद्विषयकत्वंसविषयकत्वंप्रामाण्यावगाहित्वादिसिद्धिःकथंस्यात्
ने असद्विषयकत्वहेतुकानुमानेनैवसद्विषयकत्वस्य ज्ञानत्वहेतुकानुमानेनैवसविषयकत्वस्य स्वतोग्राह्यप्रामाण्यकत्वेसति ने
ग्राह्यप्रामाण्यकत्वहेतुकानुमानेनैवस्वप्रामाण्यावगाहित्वस्यसिद्धेः नचतद्धिस्वेनैवगृह्यतइतिवाच्यं विषयानवस्थितिप्रि
ने

यायामारोपतत् घटकातिरिक्तस्यस्वतोयात्यत्वानभ्युपगमात् अपिचधूमादिदर्शनानंतरंजायमानेवह्यादिव्यवहारज
त नकेअनुमितित्वजातिविशेषस्यानुमितोमीत्यबाधितानुव्यवसायसिद्धयोअपलापासंभवात् अनुमितित्वरूपजातिविशे
षस्यसिद्धत्वेतद्वह्निन्नप्रतिव्याप्तिज्ञानादेःकारणत्वमप्यावश्यकं अन्यथातद्वह्निन्नोत्पत्तिनियमानुपपत्तेः नचास्तुअनु
मितिरूपज्ञानविशेषः अस्तुतत्रव्याप्तिज्ञानादेःकारणत्वंतथायितादृशज्ञानविशेषस्यसविकल्पकत्वेनास्मात्रविषय
कतयाप्रमात्वाभावात् कारणास्यनप्रमाणत्वमितिवाच्यं सविकल्पकज्ञानस्यास्मात्रविषयकत्वासिद्धेः अनुमितिविष
सर्वेषां यीभूतानांपर्वतत्वव दृत्वा दीनांपारमार्थिकत्वादित्येवदूषणोसारं॥ ॥ननुव्याप्तिनिश्चयस्योत्पत्तावेवप्रामाण्यंसंभ
वतिसेवनसंभवतिउयायाभावादित्यतआह व्याप्तिग्रहोयइति॥ ॥इतिप्रामाण्यवादरहस्यं॥ ॥छ॥छ॥छ॥छ॥